# Shlokas to be Recited during Study of Shrimad RamayanaM

# श्रीमद्रामायणपठनोपक्रमोपसंहारक्रमः वैष्णव

## Document Information


Text title : Shlokas to be Recited (vaiShNava sampradAya) during Study of Shrimad Ramayanam

File name : rAmAyaNapaThanopakramopasaMhArakramaHvaiShNava.itx

Category : raama, dhyAnam, mangala

Location : doc_raama

Transliterated by : N. Seshadri nsesha92@yahoo.in, Aruna Narayanan

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : January 21, 2023

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


January 22, 2023

*sanskritdocuments.org*

# श्रीमद्रामायणपठनोपक्रमोपसंहारक्रमः वैष्णव

(Dhyana Shloka to be recited before the commencement of Parayanam)

॥ वैष्णवसम्प्रदायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ वैष्णवानां श्रीमद्रामायणपठनोपक्रमे अनुसन्धेयाः ध्यानश्लोकाः ॥

॥ श्रीः ॥

रामानुज दयापात्रं ज्ञानवैराग्य भूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥ १॥

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥ २॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणायमेने ।
अस्मद्गुरोर्भगवतोस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ॥ ३॥

माता पिता युवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुळाभिरामं
श्रीमत् तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥ ४॥

भूतं सरश्च महदाह्वय भट्टनाथ
श्रीभक्तिसार कुलशेखर योगिवाहान् ।
भक्ताङ्घ्रिरेणु परकाल यतीन्द्र मिश्रान्
श्रीमत् पराङ्कुशमुनिं प्रणतोस्मिनित्यम् ॥ ५॥

पितामहस्यापि पितामहाय
प्राचेतसादेश फलप्रदाय ।
श्रीभाष्यकारोत्तम देशिकाय
श्रीशैल पूर्णाय नमो नमस्ते ॥ ६॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ ७॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ ८॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥ ९॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ १०॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥ ११॥

यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ १२॥

गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ १३॥

(हनुमान् अञ्जनासूनुः वायुपुत्रो महाबलः ।
रामेष्टः फल्गुनसखः पिङ्गाक्षोऽमितविक्रमः ॥

उदधिक्रमनश् चैव सीताशोक विनाशकः
लक्ष्मण प्रानदाताश्च दशग्रीवस्य दर्पहा ॥)
अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ १४॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ १५॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।

आदाय तेनैव ददाह लङ्कां
    नमामि तं प्राञ्जलिराञ्जनेयम् ॥ १६॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥ १७॥

यत्र यत्र रघुनाथ कीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥ १८॥

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥ १९॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥ २०॥

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥ २१॥

वाल्मीकि गिरि सम्भूता रामसागरगामिनी ।
पुनातु भुवनं पुण्या रामायण महानदी ॥ २२॥

श्लोकसारसमाकीर्णं सर्गकल्लोलसंकुलम् ।
काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ॥ २३॥

यः कर्णाञ्जलि सम्पुटैरहरहः सम्यक् पिबत्यादरात्
    वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवं
    संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम् ॥ २४॥

तदुपगतसमाससन्धियोगं
    सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितं मुनिप्रणीतं
    दशशिरसश्च वधं निशामयध्वम् ॥ २५॥

श्रीराघवं दशरथात्मजमप्रमेयं
    सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं
    रामं निशाचरविनाशकरं नमामि ॥ २६॥

वैदेही सहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ २७॥

(वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोः वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नील सरोज कोमळरुचिं रामं भजे श्यामळम् ॥)
आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ २८॥

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।
पौरुषेचाऽप्रतिद्वन्द्वः शरैनं जहि रावणिम् ॥ २९॥

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ ३०॥

॥ श्रीरघुनन्दन परब्रह्मणे नमः ॥

॥ इति श्रीमद्रामायणपठनोपक्रमे अनुसन्धेयाः श्लोकाः समाप्ताः ॥

## श्रीमद्रामायणपारायणसमापनक्रमः

॥ श्रीमद्रामायण पारायणसमापने अनुसन्धेयाः मङ्गलश्लोकाः ॥

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ १॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदये सुप्रतिष्ठितः ॥ २॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥ ३॥

कावेरीवर्धतां काले काले वर्षतु वासवः ।
श्रीरङ्गनाथो जयतु श्रीरङ्गश्रीश्च वर्धताम् ॥ ४॥

स्वस्ति प्रजाभ्यः परिपालयन्तां

न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥ ५॥

(मङ्गळं भगवान् विष्णुः मङ्गळं मधुसूदनः ।
मङ्गळं पुण्डरीकाक्षः मङ्गळं गरुडध्वजः ॥)
मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ६॥

वेदवेदान्तवेद्याय मेघश्यामलमूर्तये ।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥ ७॥

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः ।
भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥ ८॥

पितृभक्ताय सततं भ्रातृभिः सह सीतया ।
नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥ १०॥

त्यक्तसाकेतवासाय चित्रकूटविहारिणे ।
सेव्याय सर्वयमिनां धीरोदाराय मङ्गलम् ॥ १०॥

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।
संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ ११॥

दण्डकारण्यवासाय खण्डितामरशत्रवे ।
गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ १२॥

सादरं शबरीदत्तफलमूलाभिलाषिणे ।
सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ १३॥

हनुमत्समवेताय हरीशाभीष्टदायिने ।
वालिप्रमथनायास्तु महाधीराय मङ्गलम् ॥ १४॥

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।
जितराक्षसराजाय रणधीराय मङ्गलम् ॥ १५॥

आसाद्य नगरीं दिव्यां अभिषिक्ताय सीतया ।
राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ १६॥

(विभीषणकृते प्रीत्या लङ्काभीष्ट प्रदायिने ।

सर्वलोक शरण्याय श्रीराघवाय मङ्गळम् ॥

भ्रह्मादि देवसेव्याय भ्रह्मण्याय महात्मने ।
जानकी प्राणनाथाय रघुनाथाय मङ्गळम् ॥)
मङ्गलाशासनपरैः मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १७॥

कायेन वाचा मनसेन्द्रियैर्वा
    बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
    नारायणायेति समर्पयामि ॥ १८॥

॥ इति श्रीमद्रामायण पारायण समापने अनुसन्धेयाः श्लोकाः समाप्ताः ॥

Encoded and proofread by
N. Seshadri nsesha92 at yahoo.in,
Aruna Narayanan narayanan.aruna at gmail.coM

*Shlokas to be Recited during Study of Shrimad RamayanaM*
pdf was typeset on January 22, 2023

Please send corrections to *sanskrit@cheerful.com*